नं० ~~२६६~~ ३५८



मु॰ ॐ श्रीगणेशाय नमः द्रुहिणहरिहयाद्यैर्दैवहृद्दैर्नमस्यं दद
१ दभिमतमर्थं भक्तिभाजां जनानां परिस्फुरत्सकलार्थैर्योगिभिर्ध्या
यमानं हरचरणसरोजं हेमकामाभजध्वं १ नत्वा गुरुपदं रामकि
शोरेणेष्टसिद्धिदं साधकानां मुदे मुद्राप्रकाशोयं विरच्यते २ दे
वानां मुदं हर्षं रातिददातीति मुद्रा तथाच मंत्रदर्पणे रचनास
म्यग्ज्ञाता पूजायां दर्शयेन्मुद्रां तदियं मुद्रा कथिता देवेभ्यो यन्मु
दं राति मुदं रातीति मुद्रास्यादित्यन्यत्र कुलार्णवे मुदं कुर्वंति

देवानां मनां सिद्रावयेतिच तस्मान् मुद्रा इति प्रोक्ता दर्शितव्याः
कुलेश्वरि दर्शितव्या इति दर्शयितव्या इत्यर्थः पूजाकाल इतिशे
षः गोर्लोपश्चांदसः गौतमीये दशमाध्याये मोदनात्सर्वदेवा
नांद्रावणात्पापसंततेः मुद्रास्ताः कथिताः सद्भिर्देवसान्निध्य
दायिकाः यामले मोदनात् सर्वदेवानांद्रावणात्पापसंततेः
तस्मान्मुद्रेयमाख्याता सर्वकामार्थसाधिनी मंत्रदर्पणे नादी
क्षितस्तु रचयेतत्तद्भ्यंतिहिदेवतायस्मात् मुद्राभवंतिविफला ः

मु॰ सोपि च रोगी दरिद्रः स्यात् अंकुशाख्या भवेन्मुद्रा तीर्थावाहनक
प्र॰ र्मणि उच्यते लक्षणं तस्या यत्तन्त्रे मंत्रदर्पणे तीर्थान्यावाहयेन्म
२ त्रीमुद्रयांकुशरूपया अंकुशाख्या दक्षमुष्टेरंकुशीकृततर्जनी
2 ज्ञानार्णवेपि च तुर्थपटले मुष्टिबद्धा दक्षकरे तर्जन्यंकुशरूपि
णी अंकुशाख्या च मुद्रा वै त्रैलोक्याकर्षिणी भवेत् रक्षोणां कुंतमु
द्रा का तस्या लक्षणमुच्यते तंत्रसारे मुष्टोहूर्ध्वीकृतांगुष्ठां तर्ज
न्यग्रे तु विन्यसेत् सर्वरक्षाकरी ह्येषा कुंतमुद्रा प्रकीर्तिता इति ॥

कुंभमुद्राभिषेके स्यात् स्याल्लक्षणमुच्यते मंत्रदर्पणे वामांगु
ष्ठे दत्वांगुष्ठं द्विहस्ताद्वाभ्यां हस्ताभ्यां चेत् मध्याकाशं मुष्टिं कुर्या
त् कुंभाख्येयं मुद्रा प्रोक्ता मध्याकाशं मध्यशून्यं तेनैव स्थानप्रक
रणे दत्वांगुष्ठं वाममुष्टौ तदन्या मुष्टिपार्श्वगाः कुर्यात्तामेतराका
शां कुंभमुद्राभिषेचने तदन्यांगुष्ठं भित्वा दत्वांगुल्यः मुष्टिपा
र्श्वगाः वाममुष्टिपार्श्वगाः तां वाममुष्टिं चेतराकाशं मध्यशून्यं
गौतमीये समभाष्याये वामहस्तकृतां मुष्टिं दक्षहस्तेन वेष्ट

मु.
प्र.
३
3

येन कालशल्याभवेत्मुद्रा सर्वपापहरा शुभा तर्जन्यंतरे दक्षां
गुष्ठं परांगुष्ठे निक्षिप्तहस्तद्वयेनच सावकाशं मुष्टिमेकां कुर्या
त्सा कुंभमुद्रिका परांगुष्ठे वामांगुष्ठे सावकाशं मध्यशून्या कथि
ता तत्र संज्ञात मुद्रा वज्रशुभकर्मसु सा तर्ज्यंगुष्ठानामिकामेलन
रूपा तथाच ज्ञानार्णवे त्रयोदशपटले ज्यंगुष्ठानामिकाभ्यां तु
तत्त्वमुद्रेयमीरिता इति कालकर्णीप्रयोगाख्या विघ्नप्रशमकर्म
णि उच्यते लक्षणं तस्या यदुक्तं मंत्रदर्पणे कृत्वा मनेन तथाऽहं मुष्टौः

संलग्नयोस्तुगयोः तेनाभिवक्त्रे कुर्याद्धिम्नाम्नी कालकर्णिका
मुद्रा तथा तत्र सारेऽपि· अंगुष्ठौ तु मतौ कृत्वा मुष्ट्योः संलग्न
योर्हृदयोः तावेवाभिमुखौ कुर्यान्मुद्रैषा कालकर्णिका मुद्रा
तु वासुदेवाख्या ध्यानेन तल्लक्षणं तथा मंत्रदर्पणे अंजल्यंज
लिमुद्रा स्याद्वासुदेवाह्वया च सा॥ अंजलीति विभक्तिलोपश्छां
दसः अथ मातृकान्यासमुद्राः मंत्रदर्पणे मध्यानामेस्त
ते भाले हृद्धानामेव चक्षुषोः शीर्षेष्टकरपत्सोधिपार्श्वेषु

स्तु॰
प्र॰
८
५

मध्यमामता हृद्ध्रुवणायो रक्तामकनिष्ठान्वितानसोः गं
डासेम मध्यमालिसोऽनामिकादंतजिह्वयोः ष्टष्टेति स्वः क
निष्ठायाः नाभौ हृद्धान्वितालस्था जठरे कथिताः सर्वास्तल
मुक्तंरुदादिषु कथितामातृकामुद्राया भिन्यासः फलप्रदः
नेत्रांनेरे ललाटेऽनामिकामध्ये विन्यसेन्मुखवृत्तये तर्ज
नीमध्यमानामा हृद्धा नाभौ च नेत्रयोः अंगुष्ठं कर्णयोर्न्यस्य
कनिष्ठागुष्ठकौ नसोः मध्यास्त्रिस्रागंडयोश्च मध्यमां चोष्ठ

योर्न्यसेत् अनामां दंतयोर्न्यस्य मध्यमां चोत्तमांगके मुखेनामां
मध्यमां च हस्तपादे च पार्श्वयोः कनिष्ठानामिकामध्या स्तास्तुपृ
ष्ठे च विन्यसेत् ताः सांगुष्ठानाभिदेशे सर्वाः कुक्षौ च विन्यसेत्
हृदये च तले सर्वं संसयोश्च ककुत्स्थले हृत्पूर्वं हस्तपत्कुक्षि
मुखेषु तलमेव च एताश्च मातृकामुद्राः क्रमेण परिकीर्तिताः
अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फलः मुखेनामां मध्य
मां मिश्रं मुखे पदं जिह्वापरामिति पूर्वेणाविरोधः अत एव श्रो

मं॰ मेन्द्वौ रसनाग्रेणोर्ध्वकर्णिकमित्यादौ रसनापदेन विस
प्र॰ र्गो गृह्यते इति किं विदमाज्ञापयेयं पार्श्वयोरित्यस्य
१ कनिष्ठाऽनामिकामध्यास्त्यनेनैव सम्बध्यो न तु मध्यमा
5 मित्यनेन न तासु तु शेषे च विन्यसेदित्यत्र ता इत्यस्यैव प्रा
प्तेः एवं च शीर्षोष्ठकरपत्स्नाधिपार्श्वभमध्यमामतेति
मंत्रदर्पणकारेणायदुक्तं तच्चिंत्यं ग्रंथगल्पयाणामनुक्त
त्वाच्च मंत्रदर्पणकारोक्तं चिंत्यमिति शेषः ग्रंथागान्यास

मुद्राः मंत्रदर्पणे हृन्नेत्रं त्रिभिराख्यातं द्वाभ्यामस्त्रशिरो
मतं अंगुष्ठेन शिखा ज्ञेया दशभिः कवचमीरितं दिग्भिर्द
शभिः तंत्रान्तरे हृदयं मध्यमानामातर्जनीभिर्न्यसेद्बुधः
मध्यमातर्जनीभ्यां च शिरसि न्यासमाचरेत् अंगुष्ठेन शिखा
यां च दशाभिः कवचे न्यसेत् नेत्रेषु तिसृभिः स्यादस्त्रम्
र्ध्वोर्ध्वगं दिशः मध्यमातर्जनीभ्यां स्यादेगामुद्राः स्मृता इमाः
यामले हृदयं मध्यमानामातर्जनीभिः स्मृतं शिरः

म्रु· मध्यमातर्जनीभ्यांस्पृष्टांगुष्ठेनशिखास्पृष्टा दशभिःक
प्र· वचंप्रोक्तंतिसृभिर्नेत्रमीरितं प्रोक्तांगुलिभ्यामस्त्रंस्पा
६ दंगल्कमिरियमत्ता तिसृभिस्तर्जनीमध्यमानामाभिः
6 तर्जनीमध्यमानामाः प्रोक्तानेत्रत्रयेक्रमात् यदिनेत्र
द्वयंप्रोक्तंतत्रतर्जनीमध्यमे इतिभट्टपत्तनवचनादिति
तत्रसारकारः प्रोक्तांगुलिभ्यां मध्यमातर्जनीभ्यां अस्त्र
मुद्रायांविशेषोयथा मंत्रदर्पणे दक्षस्यतर्जनीमध्ये

सव्येकरतले क्षिपेत् अभिघातेन शब्दः स्यादस्त्रमुद्रा स
मीरिता ॥ इति वैष्णवेत ॥ विशेषो यथा मंत्रदर्पणे हृदिशी
र्षे तिरं गुष्ठाग्रतस्तोदशवर्मणि सरलांगुष्ठमुष्टिस्तु शि
खायां स्याद् योमुद्रा ऊर्ध्वीभूतभुजद्वंद्व मध्याङ्गुष्ठप्रदेशि
नी संभवधतिरस्त्रं स्याद्विस्मोमुद्राचनेत्रयोः दत्तस्यतर्ज
नीमध्येनरासिंहे तरस्यतु तथांतेचसारे अनंगुष्ठाकुंजवो
हस्तशाखाभवेन मुद्रा हृदये शीर्षके च अथांगुष्ठाव

सु॰
प्र॰
८

ल्वमसृष्टिः शिरखोधाकरद्वंद्वांगुलयो वर्माणि सृः नारा
चमसृष्णुह्नतवाङ्गयुगमकांगुष्ठतर्जन्यादितोधनिरस्त वि
घ्नविशङ्काकथिता स्वमुद्रा यत्राद्विणीतर्जनिमध्यमे
च यत्राद्विणीत्यनेनतरं नत्रेत्यध्याहार्यं तथा चायमर्थः
यत्राद्विणी नेत्रद्वयं तत्र नेत्रन्यासे तर्जनीमध्यमे वे दि
तव्ये यत्रेति नरसिंहेतरविल्लमंत्रे इत्यर्थः नरसिंहस्य
तु त्रिनेत्रत्वात् नन्नेत्रन्यासे तर्जन्यांगुलित्रयरूपा पूर्वो

नैव मुद्रा बोध्या अन्येषु सकलान्यासाः कर्तव्यास्तत्र
मुद्रया तथा च गौतमीये तृतीयाध्याये मन्त्रसेवन्यासे
न्यासान्पृष्ठेगौवयणामुने अंगुष्ठानामिकाभ्यां वा अन्य
था विफलं भवेत् इति सौभाग्यदण्डिनीमुद्रां रिपुजिकाय
ह्वांतथा श्रीविद्याविषयन्यासकाले संदर्शयेत्सुधीः तथा
च ज्ञानार्णवे द्वादशपटले अथ वक्ष्ये महेशानि श्रीविद्या
न्यासमनुत्तमं संपूर्णां चिंतयेद्विद्यां ब्रह्मरंध्रे हणप्रभां स्व

मु॰ वक्तुंधाषोडशार्णां महासौभाग्यदां स्मरेत् वामांसदेशे
प्र॰ सौभाग्यदंडिनीं [illegible]न्यासयेत्ततः रिपुजिह्वाग्रहां मुद्रां पा
८ दमूले प्रविन्यसेत् इति न्यासजालमुक्तं पतयोर्लक्षणं
8 उक्तं यथा मंत्रदर्पणे वामकरेणात्तमुष्टीबद्धां सरलांगुत
र्जनीं कृत्वा संभ्रामयेत्तु वामकर्णन्यासे सौभाग्यदंडिनी
मुद्रा अंगुष्ठानमिष्ठाभ्यां त्रैलोक्यं सन्निरुध्यैव वामांघ्रितले
न्यासे मासा रिपुजिह्वाग्रहा मुद्रा २ ज्ञानार्णवेपि द्वादशाप

टले वामहस्तेन मुष्टिं बध्वा कर्णप्रदेशाके तर्जनीं सरलां
कृत्वा भ्रामयेन्मन्त्रविन्नमः सौभाग्यदण्डिनी मुद्रान्यासकाले
त्वस्तु चिन्ता १ अंतरांगुष्ठमुष्टाग्रनिरुह्य जगतीमिमां रिपुजि
ह्वाग्रहामुद्रान्यासकाले त्वस्तु चिन्ता २ तत्रांतरे रिपुजिह्वाग्र
हांमुद्रां वामपादतलेन्यसेत् श्रुतनरार्द्धं मुद्राद्वयमिदं दक्षि
णहस्तेनापि भवतीति मतं तथा च तत्रांतरे अंगुष्ठांतर्दंत
मुष्टिर्वैरिजिह्वाग्रहाभता सरला तर्जनी सैव मुद्रा सौभा

मु॰ प्र॰ ६

9

गपदंडिनी १ अंगुष्ठगर्भितां मुष्टिं बद्धा दक्षिणपाणिना रि
पुजिह्वाग्रहा मुद्रा वामपादतलेन्यसेदिति अत्रैतामिति
कर्मपदमध्याहार्य्यं एतानि वचनानि श्रीविद्यान्यासप्रक
रणमंत्रदर्पणकारस्थतानि १ कूर्ममुद्रा समाख्याता देवता
ध्यानकर्मणि उच्यते लक्षणं तस्या यदुक्तं मंत्रदर्पणे वाम
पैत्रेतीर्थे तस्यां गुष्ठे च तर्जन्यां दक्षस्याथो वदनमध्यानामे
प्रदेशिनी स्वल्पां वामस्यानामास्थितो दक्षस्योर्ध्वा न तनाः पृष्ठे

उन्नतदक्षांगुष्ठं कच्छपपृष्ठप्रभं दक्षं पाणिं कृत्वा ध्यायेत्क
च्छपमुद्रा समाख्याता वामकरस्य तर्जन्यंगुष्ठमध्ये दक्षिण
करस्याधोमुखे मध्यमानामिके योजयेत् पुनस्तस्य वाम
स्यांगुष्ठे दक्षस्य मध्यप्रदेशिनी तर्जनी पुनर्वामस्य तर्जन्यां
दक्षस्य स्वल्पां कनिष्ठां अन्याश्चवशिष्टास्तिस्रो मध्यमाना
माकनिष्ठा ऊर्ध्वाग्र दक्षस्य पृष्ठे योजयेत् पुनरुत्तानं दक्षि
णांगुष्ठं कृत्वा दक्षपाणितलं कूर्मपृष्ठवत् कुर्यादित्यर्थः

मृ. अन्यत्रापि॰ वामहस्तस्य तर्जन्यां दक्षिणस्य कनिष्ठिकां
प्र. तथा दक्षिणतर्जन्यां वामांगुष्ठं नियोजयेत् उन्नतं दक्षिणां
१०. गुष्ठं वामस्य मध्यमादिकाः अंगुलीर्योजयेत् स्पष्टे दक्षिण
स्य करस्य वामस्यापि तत्तीर्थेन मध्यमानामिके तथा
अथो मध्ये च ते कुर्याद्दक्षिणस्य करस्य च कूर्मपृष्ठसमं
कुर्याद्वामपाणिं च सर्वतः कूर्ममुद्रेयमाख्याता देवता
ध्यानकर्मणि पृष्ठे कोडे इति तंत्रसारकारः १८ त्रिवं

ज्ञा त्रिपुराध्याने तस्या लक्षणमुच्यते मंत्रदर्पणे पुटितौ
चक्रौ कुर्याद्धस्तौ मध्यकनिष्ठिकाः सरलाः बद्धे च तर्जनी
म्याऽपरिवर्त्यानामिके त्रिखंडेयम् वामके प्रसृते च परिव
र्त्य कनिष्ठावंगुष्ठौ कारयेत् समौ अनामांतर्गतेन कृत्वा तर्ज
न्यौ कुटिलाकृती कनिष्ठिके नियुंजीत निजस्थाने महेश्व
रि त्रिखंडेयं समाख्याता त्रिपुराध्यानकर्मणि ज्ञानार्णवे
पि द्वादशपटले पाणिद्वयं महेशानि परिवर्तनयोगतः

मु॰ प्र॰ ११

योजयित्वातर्जनीभ्यामनामेधारयेत्प्रिये मध्यमेयो
जयेन्मध्येकनिष्टेतदयस्तथा अंगुष्ठावपिसंयोज्य
त्रिधायुग्माक्रमेणतु त्रिखंडानाममुद्रेयंपरिपुसंक्षो
भकारिणीति १२ शिवेयागालिनीमुद्रामऽर्घस्यो
परिचालयेत् उच्यतेलक्षणंतस्यायद्रूकंमेवदर्पणे
पृष्टेपृष्टेदक्षांबधांगुष्ठौकनिष्टाभ्यां कुर्यादपराःस
रलामुद्रेयंगालिनीकथिता अन्यत्रापि कनिष्ठांगुष्ठ

कौसक्तौकरयोरितरेतरं तर्जनीमध्यमानामाः संहता
अंगुष्ठवर्जिता मुद्रेषा गालिनी प्रोक्ता शंखतोयविशोधने
गौतमीयेनवमाध्याये दशकृत्वोजपेन्मूलं गालिनी
शिखयान्यसेत् करौ प्रसार्य चान्योन्यं संश्लेक्रमयोगतः
प्रयोज्य दक्षिणांगुष्ठं तथा वामकनिष्ठया वामांगुष्ठं द
क्षिणया मुद्रेयं गालिनी मता अर्घ्यस्य फलदा प्रोक्ता शं
खस्योपरि चालिता शिखया वषट्कारेण दक्षिणयाद

मु॰ दक्षिणकनिष्ठया ७३ मत्स्याख्यां मुद्रयात्वर्घ्यपात्रमा
प्र॰ च्छादयेत्सुधीः उच्यते लक्षणं तस्या यत्नकं मंत्रदर्पणे
१२ दक्षिणकरस्य पृष्ठे वामकरतलमध्यविन्यस्य सम्यक्कु
12 चलितांगुष्ठौ कुर्यात्मत्स्यस्वरूपिणीं मुद्रां अन्यत्रापि
दक्षपाणिपृष्ठदेशे वामपाणितलंन्यसेत् अंगुष्ठौ चा
लयेत्सम्यक्मुद्रेयंमत्स्यरूपिणी ७४ मुद्रात्तदेवता
ध्यानेनवप्रोक्तामनीषिभिः आवाहनीस्थापनीचसं

तीयासन्निधापनी तुर्यासन्निरोधनी स्यात् सम्मुखीक
रणीपरा सकलीकरणी षष्ठी सप्तमी त्ववगुण्ठनी यामृ
तीकरणी प्रोक्ता धेनुमुद्रात् साष्टमी परमीकरणी मुद्रा
नवमी परिकीर्तिता क्रमेण लक्षणन्यासां प्रोक्तानि मंत्र
दर्पणे उत्तानांजलिमूर्द्धनीत्वाथ्यहावयः कुर्यात् आवा
हनीयमुद्दितात्वधोमुखी स्थापनी च सैव स्यात् द्वावि
तिहौवारावित्पर्व्यः २ आश्लिष्टमुष्टियुगमस्याहीं गुष्ठेव

मु० सन्निधाने स्यात् अंगुष्ठगर्भिणीयं विख्याता सन्निरोधे
प्र० हि ४ द्वावुन्नतौ मुष्टीकृतावियं संमुखीकरणे ५ देवष
१३ डंगन्यासः सकलीकरणमिह संप्रोक्तं ६ वामकरवि
13 रचिता चेत्सा लाधो वदनतर्जनीमुष्टिः स्यादवगुण्ठनमु
द्रा सत्यमितो भ्रामिता कवचात् भ्रामितेति वामावर्त
क्रमेण कवचादिति कवचमुद्रा येत्यर्थः कवचंहुमि
ति मुद्रेयं करद्वयेनापि भवतीत्यग्रे गौतमीयवचनेस्फा

नाग्नीवीयवचनेचस्फुटीभविष्यति ७ मिलितामि
थोऽभिवदनाऽनामास्वल्याप्रदेशिनीमध्या गोमुद्रेयं
कथितावह्नेननतयामूर्तिंकुर्यात् वह्नेनवह्नबी
जेनवंइत्यनेन ८ ग्रथितांगुष्ठौचमिथः प्रसारिताःसु
परांगुल्यः परमीकुर्यादनयाकथिताकविभिर्महामु
द्रा ९ गौतमीये दशमाध्याये. ऊर्ध्वांजलिमधः कुर्या
दियमावह्ननीभवेत् १० सेयंतुविपरीतास्यात्मुद्रास्याप

मु॰ नकर्मणि विपरीतेत्पयोमुखीत्यर्थः २ बाह्यांगुष्ठद्वये
प्र॰ मुष्टीमुद्रास्यात्सन्निधापनी ३ अंगुष्ठगर्भिणी सैव मुद्रा
१४ स्यात्सन्निरोधनी ४ उत्तानमुष्टियुगला सन्मुखीकरणी
14 मता ५ अन्योन्यं तर्जनीयुगमभ्रामणादवगुंठनी ६ अ प्र^
न्योन्यमिति अन्योन्याभिमुखागमनपूर्वकमित्यर्थः
तथा च दक्षिणतर्जन्या दक्षिणावर्तेन वामतर्जन्या वा
मावर्तेन भ्रमणादवगुंठनी मुद्रा भवतीति फलितार्थः

तेनैव अंगुलीः संहिताः कृत्वा करयोर्वामदक्षयोः दक्षा
नामामध्यमायुक्तावामहस्तकनिष्ठिका वामानामामध्यमायु
क्तादक्षपाणिकनिष्ठिका दक्षमध्यमाक्रांतावामहस्तस्य
तर्जनी वाममध्यमयाक्रांतादक्षहस्तस्य तर्जनी संयुक्तोका
र्येविहितानंगुष्ठावुभयोरपि धेनुमुद्रानिगादितागोपितासा
यकोत्तमैः ७ ज्ञानार्णवे चतुर्थपटले· आवाहन्यादिमुद्रा
स्तु कथयामितवानघे ॐह्रींजलिमधःकुर्यादियमावाह

मु॰ नीभवेत् अत्रांजलिपदमनामामूलपर्वणोरंगुष्ठाग्रद्व
प्र॰ यसंयोगयुक्तांजलिपरं तत्र सारस्वतवक्ष्यमाणतंत्रांतरव
१५ चनैकवाक्यत्वात् एवं पूर्वोक्तवचनयोरपि बोध्यं इयं तु
15 विपरीतास्यात्तदा वैष्यापनीभवेत् मिलितमुष्टियुगलं
सन्निधायनरूपिणी इ अंतरांगुष्ठमुष्टिभ्यां सन्निरोधन
रूपिणी अत्रांतरांगुष्ठेत्युपादानाद्वचनांतरैकवाक्यत्वाच्च
पूर्वमुद्रायांमुष्टियुगलस्य बाह्यांगुष्ठत्वमवगम्यते इत्य

वधेय ४ एतस्याएवमन्त्रायायास्तर्जन्योसरलेयदा अवगुंठ
नमन्त्रेयंसर्वकार्यार्थसाधनी तर्जन्यौसरलेइतिकृत्वाऽभि
नोभ्यामपनेइतिशेषोवचनात्तैकवाक्याचात् ५ अंगमन्त्रा
न्न्यसेदेविदेव्यंगेसाधकोत्तमः सकलीकरणंनाममन्त्रेयं
व्याप्तिरूपिणी देव्यंगेइतिअत्रदेवीपदमुपलक्षणं ६ क
एवैकत्रसंयोज्यआरात्रिकविधौप्रिये परमीकरणंनामं
मन्त्रेयंतत्ततःपरं आरात्रिकमिवेतित्रिकोणवदित्यर्थः आ

मु॰ गात्रिकविधाविनिपाठेत त्रिकोणाकारा विस्पर्ष्याः ७ प
प्र॰ रिबद्धमुकशैपञ्चानर्जनीमध्यमेयुते कनिष्ठानामिकांगु
१६ ष्ठपरस्परंयुतंकुरु धेनुमुद्रेयमाख्यातामृतीकरणेभ
16 वेत् ८ तत्रसारे॰ हस्ताभ्यामंजलिंबध्वानामिकामूलप
र्वणोः अंगुष्ठौनिक्षिपेत्सेयंमुद्रावाहनीस्मृता १
अथोमुखीत्वियंचेत्स्यात्स्थापनीमुद्रिकास्मृता २ उ
च्छ्रितांगुष्ठमुष्टोस्तुसंयोगात्सन्निधापनी ३ अंतःप्रवे

शितांगुष्ठासैवसंरोधनीमता ४ उत्तानमुष्टियुगलासम्मु
खीकरणे स्मृता ५ देवतानां षडंगानां न्यासः स्यात्सक
लीकृतिः ६ सव्यहस्तकृतामुष्टीदीर्घाधोमुखतर्जनी अ
वगुंठनमुद्रेयमभितो भ्रामिता मता ७ अन्योन्याभिमुखा
श्लिष्टाकनिष्ठानामिका पुनः तथैव तर्जनी मध्याधेनुमु
द्राप्रकीर्तिता अमृतीकरणं कुर्यात्तया साधकसत्तमः ८ अ
न्योन्यग्रथितांगुष्ठा प्रसारितपरांगुलीः महामुद्रेयमुदिता

मु॰ प्र॰ ८

परमीकरणेबुधैः ९ प्रयोजयेदिमामुद्रादेवताकानक

मेणि २३ लेलिहानामगुद्रातुजीवन्यासेप्रकीर्त्तिताः

उच्यतेलक्षणंतस्यायदुक्तंमंत्रदर्पणे स्फुरयोवक्राःस्त

समामध्यानामाप्रदेशिन्यः स्वल्पासरलाकुर्यात्तद्विष्वा

हृद्धामनामायां जीवन्यासेविहितासंप्रोक्तालेलिहामु

द्रा स्वल्पाकनिष्ठा तंत्रसारे तर्जनीमध्यमानामाःस

माःकुर्यादधोमुखाः अनामायांक्षिपेद्वृद्धामृज्वीकृत्वा

17

कनिष्ठिकां लेलिह्वानाममुद्रेयंजीवन्यासेप्रकीर्त्तिता २४

अथगंधादिमुद्राः तत्रसारे तंत्रांतरे मध्यमानामिकांगु

ष्ठैरंगुल्यग्रेणपार्वति दद्याद्गंधविमलंगंधंमूलमंत्रेणसाध

कः १ अंगुष्ठतर्जनीभ्यांचपुष्पंचकेनिवेदयेत् २ यथांगंधेन

ण्यादेविधूपंदद्याद्विचक्षणः मध्यमानामिकाभ्यांतुमध्यप

र्वणिदेशिकः अंगुष्ठाग्रेणदेवेशिधृत्वाधूपंनिवेदयेत् अंगो

लनंनियाहकृत्वागायत्र्यामूलयोगतः ३ ततामुद्रयादे

मु॰ विनैवेद्यंविनिवेदयेत् ४ मूलेनाचमनंदद्यात्तांबूलंत
प्र॰ त्वमुद्रया ५ पुष्पदानमुद्राज्ञानाख्यैवेपितयोदशापटले
१८ पुष्पंसमर्पयेद्देविमुद्रयाज्ञानसंज्ञया अंगुष्ठतर्जनीयो
गातज्ज्ञानमुद्राप्रकीर्तिता २९ प्राणादिमुद्रानैवेद्यंदत्त्वा
18 संदर्शयेत्सुधीः तासांस्वरूपंयथा कनिष्ठानामिकेअं
गुष्ठेनस्पृशेदितिप्राणमुद्रा १ अनामामध्यमेअंगुष्ठेन
स्पृशेदित्यपानमुद्रा २ मध्यमातर्ज्जनीमातर्जन्यावंगु

ष्ठेन स्पृशेदिति व्यानमुद्रा ३ तर्जनीमध्यमानामास्त्वंगु
ष्ठेन स्पृशेदित्युदानमुद्रा ४ तर्जन्याद्यंगुलिचतुष्टयमंगु
ष्ठे स्पृशेदिति समानमुद्रा ५ तथा च मंत्रदर्पणे कालीपू
जाप्रकरणे अंगुष्ठेन कनिष्ठादिपूर्वपूर्ववियोगतः अ
नुलोमेन युगशो विलोमात्रिचतुः स्पृशेत् बालाविला
सतंत्रेपि कनिष्ठानामिकेऽनामामध्येमध्यांसतर्जनीं
तर्जन्यादित्रयं तुर्यमंगुष्ठेन स्पृशेत्क्रमात् प्राणापानव्या

मु॰ नोदानसमानाख्येहिठंतिमाः तारायाःप्राणादिमुद्रा।
प्र॰ मुद्राःपूर्वोक्ताःयथा ओंप्राणायस्वाहेत्यादयःप्राणादिमु
१९ द्राःकनिष्ठानामिकेइत्यादिनाक्रमादित्यनेनोक्ताःप्राणा
19 दिमुद्राइत्यर्थः पूर्ववदेवप्राणमुद्रा १ अथवा मध्यमा
तर्जन्यावंगुष्ठेनस्पृशेदित्यपानमुद्रा २ अनामामध्यमे
अंगुष्ठेनस्पृशेदितिव्यानमुद्रा ३ उदानमुद्रासमानमुद्रा
पिचपूर्ववत् ४ तथाचमंत्रचिंतामणौ कनिष्ठानामि

केमध्यात्तर्जन्योर्हृद्वयास्पर्शोत्त् अनामामध्यमेतिस्व
स्तर्जन्याद्याश्चतस्रकाः इतिप्राणादिमुद्रावास्वतंत्रात
त्रसमताः तर्जन्याद्याइतिकाकादित्यायेनाभयत्रसंब
ध्येतचतस्रकाइति अत्कारयुक्तपूर्वस्यापिकचिद्गृहत्वा
मात्रछेदोभगः यथा कस्त्वंविवर्दद्विजोहंकुतइहन्नपते
र्दक्षिणार्थीमत्वेस्मिन्स्वर्गंगांचगृहाणत्रिपदपरिमि
तांभूमिमभ्यर्थयामि त्वभ्यंददेनेतियावद्ददातिबलिरसो

मु॰ तावदेव त्रिपादैस्त्रैलोक्याक्रांतमूर्तिः प्रहसितवदनो
प्र॰ वामनः पातु युष्मान् क्रमदीपिकायां च स्पृशेत्कनि
२॰ ष्ठोपकनिष्ठिके ह्यंगुष्ठमूर्ध्ना प्रथमे हृन्मुद्रा १ तथाप
20 रा तर्जनिमध्यमे स्यात् २ अनामिकामध्यमिके च म
ध्या ३ अनामिकातर्जनिमध्यमाः स्या ४ तहष्ठवतर्थी
सकनिष्ठिकाऽस्ताः स्यात्पंचमी तद्वदिति प्रदिष्टाः ५
प्राणादिमुद्रा निजमंत्रयुक्ताः प्राणापानव्यानोदान

समानाः क्रमात्स्वतर्ज्ज्यायुक्ताः तारायाराः बध्वाचेद्धाः
हृल्लाधुनस्सेमनवः तारायाराः प्राणवाद्याः हृल्लाधनो
ऽग्नेर्वध्वास्वाहयाइद्धाः श्रोणभिता ग्रंनेदिति शेषः तथाच
ॐ प्राणाय स्वाहा इत्यादयः पंचप्राणादिमंत्रास्तानुच्चरन्
क्रमेण प्राणादिमुद्रादर्शयेदिति यामले ग्रासमुद्राणुक्ता
श्चेगुल्यः कुटिलीभूताविरलाग्राः परस्परं ग्रासमुद्रा स
मा व्यानासमव्यापानो निर्योजिता प्राणोऽपानस्तृतीय

मु॰ स्तुव्यानश्चोदानएवच समानःपंचमेज्ञेयःप्राणाः
प्र॰ पंचसमीरणाः अंगुष्ठेनसमायुक्ताकनिष्ठानामि
२१ कातथा प्राणमुद्रासमाख्याताप्राणाहवनकर्मणि
१ तर्जनीमध्यमांगुष्ठैस्त्रिभिरेकीकृतंयदि स्यादऽपा
21 नकृतोमुद्रा २ तथानामिकमध्यमा अंगुष्ठेनसमायु
क्तानियुक्ताव्यानहोमके ३ निष्कनिष्ठेनयामुद्रासोदा
नहवनेस्मृता ४ सर्वाभिःसंस्मृतामुद्रासमानाहुति

कर्माणि ५ एतानि वचनानि चतुर्दशोल्लासे श्रीशिवानंद
तरंगिणिकाख्यानानि रामकिशोररचिते ग्रंथे मुद्राप्र
काशाख्ये इति साधारणमुद्रानिर्णयश्चादिपरिच्छेदः १
शिवविष्णुदिनेशानां गणेशांबिकयोरपि कथ्यंते मुद्रि
कास्तत्र दश मुद्राः शिवस्य तु लिंगयोनित्रिशूलाक्षमा
लेष्टाभीमृगाख्यया खट्वांगाख्या कपालाख्या तथा डम
रुनामिका ग्रंथेनासां लक्षणानि निगद्यंते क्रमेण हि।

मु॰ मंत्रदर्पणे ॐ अङ्गुष्ठतर्जन्योर्मध्ये अङ्गुष्ठेन बध्नीयेद्धी
प्र॰ मान् वामाङ्गुलीश्चापश्चाद्दन्ताभिर्बध्नीयेज्ञवैलिंग १
२२ दन्ताभिरङ्गुलीभिः लिंगमिति लिंगमुद्रेत्यर्थः सव्य
ैवोत्तरौ कृत्वा मध्यमाग्रस्पर्शं स्थिते वक्राभ्यां तर्ज
नीभ्यां तु निबध्नीयाद्दनामिके कनिष्ठे हि नियुंजीत
मध्यमाङ्कोडदेशाके कनिष्ठे योस्य संख्यावङ्गुष्ठेयो
निरीरिता २ तिस्रः प्रसारयेच्चैव दंगुष्ठेन च कनिष्ठिकां

22

बद्धा एषा त्रिशूलमुद्रा दक्षिणहस्तस्थिता कथिता ३
तर्जन्यंगुष्ठाग्रेग्रथिते कृत्वा प्रसारयेदपराः तिस्रोंगुली
श्च मिलिताः कविभिः कथिता ज्ञमालेयं ४ कुरुवरदाम
यमुद्रे वरदाभयवत्करौ कृत्वा सरलाः सकलांगुल्योंगु
ष्ठं निक्षिप्य तर्जनीमूले ५ मध्यमानामाशिरसि हृष्टाशिर
वरं नियुंजीत एषा मृगमुद्रा स्यादवशिष्टे समुच्छ्रिते कु
र्वीत ६ दक्षिणपंचांगुलयो मिलिताई समुन्नताः कार्याः

मु॰ एवं खट्वांगाख्या मुद्रा प्रियकृत् प्रोक्ता शिवस्यापि ८ पात्र
प्र॰ मिव वामहस्तं कृत्वांगे वामके न्यस्य कुर्यादुच्छ्रितवद्ध
२३ त्कपालमुद्रा भवेदेषा ९ दक्षिणमुष्टिं शिथिलां कृत्वा
किंचित्समुच्छ्रितां संचालयेद्घण्टकर्णौ प्रभवति एवं डम
23 रुमुद्रेयं १० तेत्रसारे उच्छ्रितं दक्षिणांगुष्ठं वामांगुष्ठेन वं
धयेत् वामांगुलीर्दक्षिणाभिरंगुलीभिश्च वंधयेत् लिं
गमुद्रेयमाख्याता शिवसान्निध्यकारिणी ११ मिथः क

निष्टिके बध्वा तर्जनीभ्यामनामिके अनामिकोर्ध्वसंश्लि
ष्टदीर्घमध्यमयोरधः अंगुष्टाग्रद्वयं न्यसेद्योनिमुद्रेयमी
रिता २ अंगुष्ठेन कनिष्टां तु बध्वा श्लिष्टांगुलित्रयं प्रसारये
त्त्रिशूलाख्या मुद्रेषा परिकीर्तिता ३ अंगुष्ठतर्जन्यग्रे तु ग्रंथि
यित्वांगुलित्रयं प्रसारयेदक्षमालां मुद्रेयं परिकीर्तिता ४
अधःस्थितो दक्षहस्तः प्रसृतो वरमुद्रिका ५ ऊर्ध्वीकृत्वा वा
महस्तः प्रसृतो भयमुद्रिका ६ प्रसृतो निकुञ्चः पाणिर्नि

मु॰ प्र॰ २४

24

कुब्जः प्रसृतइत्यमरः मिलितानामिकांगुष्ठमध्यमाग्रे
नियोजयेत् श्लिष्टांगुल्यः क्रियते कुर्यान्मृगमुद्रेयमीरि
ता श्लिष्टांगुल्यः क्रियते इति नात्र प्रकृति छांदसत्वात् ७
पंचांगुल्याः दक्षिणास्तु मिलिता स्युर्हंसमुद्रिताः एवं हंसमु
द्रा विख्याता देवस्याति प्रियामता देवस्य शिवस्य ८ पात्र
वहामहस्तं तु कृत्वांगे वामके तु या नियोज्य क्रियते च कु
र्यान्मुद्रा कापालिकी मता ९ मुष्टिं च शिथिलां बध्वाई

षडङ्क्षितमध्यमां दक्षिणां तूर्ध्वमुन्नमय्य कर्णदेशे प्रचाल
येत् एषा मुद्रा डमरुका सर्वविघ्नविनाशिनी ९ एतानिव
चनानि तंत्रसारकारधृतानि ध्यानात्पूर्वमिमां मुद्राः पूजां
ते वा प्रदर्शयेत् बोद्धव्यमेवमन्यास्वदेवतास्वपि साधकैः
तथा च मंत्रदर्पणे मुद्राः संदर्श्य दिग्बंधं कृत्वा ध्यायेज्जग
त्प्रभुं इति तंत्रसारकारेणापि सामान्यपूजापद्धतौ न्यास
जालमुक्त्वा ततस्तत्कल्पोक्तमुद्राः प्रदर्श्य ध्यानं कृत्वा

मं॰ मानसैः संपूज्य शंखस्थापनं कुर्यादित्युक्तं सनत्कुमार
प्र॰ तंत्रेपि॰ पीठस्यार्चनमंगदेवयजनं प्राणप्रतिष्ठां ततश्चा
२५ ह्वानं निजमुद्रिकाविरचनं ध्यानं प्रभोः पूजनमिति पंचा
25 यतनदीक्षाप्रकरणे तंत्रसारकारः स्तुतमेतत् ज्ञानार्णवे
पि द्वादशपटले न्यासजालमुद्राप्राणानायम्य विधि
वन्मुद्रासन्नद्धविग्रहः स्यामभिधाय क्षोभनद्रावणाकर्ष
वश्योन्मादमहांकुशाः खेचरीबीजयोन्याख्यानवमुद्रा

स्तत्क्रमात् इत्युपक्रम्य तत्तन्मुद्रा उक्ता एवंविन्यस्तदेहः
सन्मुद्रासन्नद्धविग्रहः स्वंतर्यागविधिं कुर्यात्तेन सान्नात्स्व
यं विभुरित्यभिधाय द्वादशपटलं समाप्य त्रयोदशपटले
ध्यानमुक्त्वाऽन्तर्यागविधिरुक्तः पूजांते मुद्राप्रदर्शनापि
तत्रैवोक्ता तथा च सर्वोपचारैराराध्य मुद्रासंदर्शयेत्क्रमा
त् इति गौतमीये दशमाध्याये पूजांते नवीननीरदस्या
मंनीलेंदीवरलोचनं वल्लवीनंदनं वंदे कृष्णं गोपालरूपि

मु॰ णामित्यादिस्तुतिमुक्त्वा ततो मुद्राः प्रदर्श्याप्यग्निसंस्का
प्र॰ रमाचरेदित्युक्तं एकत्रनिर्णीतः शास्त्रार्थ इतिन्यायेन व्या
२६ वर्ष्यायाः साधारणत्वबोध्येति द्विजातिना रामकिशोर
26 नाम्नामुद्राप्रकाशे रचिते द्वितीये अयं परिच्छेद ॥ मेषा
मुद्राविनिर्णयो नाम ग्रन्थः समाप्तिं २ संसारसिंधुं तरि
तुं स्वस्त्वेन संचिंत्यमानं सततं यतीन्द्रैः स्त्रगावलीवंद्यप
दारविंदं सदा मुकुंदं स्वजना भजध्वं एकोनविंशतिर्मुद्रा

विष्णुरुक्ता मनीषिभिः शंखचक्रगदापद्मवेणुश्रीवत्स
कौस्तुभा वनमाला तथा ज्ञानमुद्रा बिल्वाङ्कया तथा ग
रुडाख्या परा मुद्रा विष्णोः संतोषवर्द्धिनी नारसिंही च वा
राही हयग्रीवी धनुस्तथा बाणमुद्रा च परशुर्जगन्मोहि
निका परा काममुद्रेत्यमूषांतुकथ्यंते लक्षणानि हि सं
प्रदर्शितो शंखचक्रगदाद्या विष्णोरेकोनविंशतिर्मुद्राः
वामांगुष्ठं धृत्वा दक्षिणमुष्टया प्रसारयेदृढं कृत्वाभांतमु

मु॰ ष्ठिंवामांगुल्यःप्रसारिताःश्लिष्टाः दक्षांगुष्ठःस्पृष्टाःकार्या ः

प्र॰ स्याच्छंखमुद्रैषा १ चेदंगुष्ठकनिष्ठेलग्नेभुग्नेप्रसारितेकु

९ र्यात् संमुखंहस्तौकृत्वास्यादेषाचक्रमुद्रैषा २ हस्तौमि

थोभिवदनौकुर्याग्रथितांगुलीर्भूयः गादिनेवगदामुद्रा

27

संलग्नेस्तुप्रसारितेमध्ये ३ पश्चात्पद्ममुद्राहस्तौचेत्सं

मुखौकृत्वा तलसंमिलितांगुष्ठौवंगुल्यःसन्नतोन्नताः

कार्याः ४ श्रोष्ठेलग्नांगुष्ठोवामस्यकनिष्ठिकातस्य दक्षां

ग्रुष्टष्टष्टेनतस्यचमर्त्लोकनिष्ठिकाकार्या शिष्टास्तिस्तो
मतिमान्किंचित्संकोच्यचालवेद्देणः दंताग्रुष्टष्टष्ट
ऊरुइतिचाकारयुक्तः पूर्वस्यापिकाचिद्ध्रुत्वामात्रकंदोम
गः शिष्टास्तर्जनीमध्यमानामाः वेणुरितिवेणुमुद्रेत्य
र्थः ष्टष्टेष्टष्टंदत्वाग्राकृतर्जन्योकनिष्ठयाबध्वा मध्याना
मेचमिथ्योण्यंग्रुष्टेनतत्तिबध्नीयात् विप्रविरचनमस्याग्र
हृतान्नेयंश्रीवत्समुद्रायाः ६ दक्षिणकनिष्ठिकांचेदना

मु॰ मिकाङ्गुष्ठसंलग्नां वामस्य कनिष्ठिकया बध्वाऽनामां
प्र॰ च तर्जन्या दक्षस्याङ्गुष्ठाग्रौ मध्याङ्गुष्ठौ परस्परलाः कौ
२८ स्तुभमुद्रा कथिता शिखरविलग्नाङ्गुष्ठस्यापि वामस्य
तिर्यग्भूतं दक्षस्येति द्वयोरिति बोध्यं ७ कंठादिक
28
पादान्तं तर्जन्यङ्गुष्ठयोगेन वनमालामुद्रा स्यात् करयोः
स्वग्वक्षसंस्पर्शात् ८ तर्जन्यङ्गुष्ठाग्रे मिलिते हृदये न्यसे
द्विधिना वामे जानुनि वामं हस्तं ज्ञानाभिधा मुद्रा ९

वामांगुष्ठोर्द्धाग्रं दक्षांगुष्ठेन संगृह्य शिष्टाभिस्तु तदग्रेता
श्चापि वामांगुलीभिश्च बध्वा गाढं स्मारस्सत्वा संस्थापये
हृदये वैल्लव निर्मलवृद्धे गोप्येयं बिल्वमुद्रा स्यात् स्मार
कामबीजं १० हस्तौ विमुखौ कृत्वा तर्जन्यौ हे कनिष्ठिकेग्र
थिते अंगुष्ठौ च श्लिष्टौ मध्यमानामे तथापरौ हौ चालये
स्वविधिना गाढं मुद्रा वृषेक्षा ११ जान्वंतरालहस्तौ भू
संलग्नौ विधाय मुद्रः कंपितप्रास्य विहृते चित्रकोष्ठौ च

मु॰ समाहृतौ कुर्यात् संलेलिहानकण्ठजिह्वां मुद्रां दान्तसिं
प्र॰ ह्वाख्या अङ्गुष्ठाभ्यामथवा कनिष्ठिके द्वे समाक्रम्य कर
२९ योस्तथोमुखवीभिः सर्वाभिर्नरहरेर्मुद्रा १२ देवस्योपरि वा
मं कृत्वा तानन्त्रयः करं नमयेत् वाराहीयं मुद्रा तां तस्मै दर्शि
29 येन्मंत्री ऊर्ध्वाधोमुखहस्तौ दक्षिणवामौ क्रमेणैव अङ्गुल्य
ग्रं थिकं वाराही वा स्मृता मुद्रा १३ वामहस्ततलेनादन्तां।
गुल्फस्तथोमुखवारोप्याः तुरगग्रीवा तासां मन्त्रस्यात्यो

विकुंचयेन्मध्या १४ अंगुष्ठेनतुबध्वा वामानामाकनि
ष्ठिके योज्य मध्यातर्जन्यग्रे वामस्कंधे प्रदर्शयेच्चापं योज्य
इति मध्यमातर्जन्यग्रयोर्विशेषणं चापमितियन्तु मुद्रेत्य
र्थः १५ मुष्टिंबध्वादलहस्तेनहृद्धां मध्यातर्जन्यंतरालेनि
योज्य दीर्घीकृत्वाकृष्यकर्णस्पर्शेनस्यात्क्षुरिकेविलोमश्चा
पिवाणाख्यमुद्रा प्रारमुद्रावा प्रोक्ता दक्षिणांगुष्ठेस्तुतर्ज
नीसरला १६ करयोस्तलेनतलं चे तिर्यक्संयोज्य चांगुलीः

मु॰ प्रसृताः कुर्याद्बद्धसंहतास्ताः संप्रोक्तापरमुद्रेयं १७
प्र॰ ऊर्ध्वाङ्गुष्ठद्वितयं मुष्टिद्वितयमिति मोहनी जगतो १८
३॰ कृत्वा घटितौ हस्तौ प्रसृताङ्गुलिकौ च तर्जन्यौ मध्यापृष्ठे
ऽङ्गुष्ठौ मध्याक्रोडे स्थितौ कामः काम इति काममुद्रेत्यर्थः
30 १९ तदनन्तरे॰ वामाङ्गुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना
कृत्वोत्तानं ततो मुष्टिं सङ्गुष्ठं तु प्रसारयेत् वामाङ्गुल्यस्त
थाश्लिष्टाः संयुक्तास्तु प्रसारिताः दक्षिणाङ्गुष्ठसंस्पृष्टा

ङ्गुष्ठमूलके अङ्गुष्ठमध्यमेवामे संयोज्य सरलाः पराः
चतस्त्रोप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका ७ स्पृष्टोतकं
ष्ठादिपादांतं तर्जन्यांगुष्ठयातथा करद्वयेन मालावन्मु
द्रेयं वनमालिका तर्जन्यंगुष्ठकौ सक्तावग्रतो विन्यसेहृदि
वामांहस्तांबुजं वामजानुमूर्द्धनि विन्यसेत् ज्ञानमुद्राम
वेदेवाराम चंद्रस्य प्रेयसी ९ अंगुष्ठं वाममुद्दंडितमितरक
रांगुष्ठकेनापि बध्वा तस्याग्रं पीडयित्वां गुलिभिरपि चता

मु॰ वामहस्तांगुलीभिः बद्धांगाद्धं हृदिस्थापयत्तु विमलधी
प्र॰ र्मोहरन्मारबीजं विल्वाख्यामुद्रिकैषास्फुटमिह गदितागो
३२ पनीयाविधिज्ञैः १॰ उत्तरकरांगुष्ठकेन दक्षिणहस्तांगुष्ठे
32 न तस्य दक्षिणहस्तांगुष्ठस्य अंगुलीभिर्दक्षिणहस्तांगु
लिभिः ता दक्षिणहस्तांगुलीः मारबीजं कामबीजं हस्तौ
विमुखौ कृत्वाग्रथयित्वा कनिष्ठिके मिथस्तर्जनिके श्लिष्टे
श्लिष्टावंगुष्ठकौ तथा मध्यमानामिके तु द्वौ पक्षाविव वि

चालयेत् पक्षाग्रहडमुद्रास्या हि सोः संतोषवर्द्धिनी ११
जानुमध्ये करौ कृत्वा चिबुकोष्ठौ समाहृतौ हस्तौ तु भूमिसं
लग्नौ कंपमानः पुनः पुनः मुखं विनिहृतं कंकुर्यालेलिहानं
च जिह्विकां नारसिंही भवेदेषा मुद्रा नत्मनि वर्द्धिनी १२ प्रका
रांतरं अंगुष्ठाभ्यां तु करयोस्तथा कनिष्ठिके अथो मुखी
भिः सर्वाभिर्मुद्रेयं न्टहरेर्मता १३ देवोपरि करं वामं कृत्वोन्नान
मथः सुधीः नमयेदिति संप्रोक्ता मुद्रा वाराह संज्ञिका प्रका

मु॰ गांतरं दक्षहस्तं चोर्द्ध्वमुखं वामहस्तमधोमुखं अंगुल्यग्रे
प्र॰ तु संयुक्तं मुद्रा वाराह संज्ञिका १४ वामहस्ततले दक्षांगु
३२ लीस्तास्त्वधोमुखीः संयोज्य मध्यमां तासां तन्मध्याधो विकुंच
33 येत् हयग्रीवप्रिया चैषा तन्मूर्तेर्नुकारिणी १५ वामस्य म
ध्यमाग्रं तु तर्जन्यग्रेण योजयेत् अनामिकां कनिष्ठां च तस्यां
गुष्ठेन पीडयेत् दर्शयेद्वामके स्कंधे यन्नृसिंहे यमीरिता १५ द
क्षमुष्टेस्तु तर्जन्या दीर्घया बाणमुद्रिका १६ यद्वा ज्ञानार्णं

वे यथाहृल्लगतेचापंतथाहृल्लंकृतस्थिये चापमुद्रेय
माख्याताबामहृल्लेप्यवस्थिता यथाहृल्लगताबाणास्त
थाहृल्लंकृतस्थिये बाणमुद्रेयमाख्यातारिपुवर्गनिकृंत
ती १६ तलेतलेतकरयोस्तिर्यक्संयोज्यचांगुलीः संहृ
ताःप्रसृताःकुर्यात्तमुद्रापरमुसंज्ञिका १७ उद्धितांगुष्ठ
मुष्टीहेमुद्रात्रैलोक्यमोहिनी १८ हृल्लोत्तसंपुटीकृत्वाप्र
सृतांगुलिकौतथा तर्जन्योमध्यमाङ्गुष्ठैरंगुष्ठौमध्यमा

मु॰ ष्ठितो काममुद्रियमुदिता सर्वदेवप्रियंकरी ॥ १९ ॥ एता
प्र॰ नि वचनानि तंत्रसारकारस्थानानि श्रीगोपालार्चने
३४ वेणुर्न्दहरेर्नारसिंहिका वाराहस्य च पूजायां वाराहाख्यां
प्रयोजयेत् हयग्रीवार्चने मुद्रां हायग्रीवीं प्रदर्शयेत् रा
34 मार्चने धनुर्बाणमुद्रे परशुसंज्ञिका जगन्मोहनसंज्ञा
च परशुरामस्य पूजने द्विजातिना रामकिशोरनाम्ना
मुद्राप्रकाशे रचिते प्रयत्नात् अयं परिच्छेद उपेन्द्रमुद्रा

विनिर्णयो नामगानह्लतृतीयः ३ यीरामभजत्तदिनेशं
कल्याणसिंध्यै त्रिलोकीशं भजनाद्यस्याद्यो यत्नश्चपत्सुद
यातमांसीव सूर्यस्यैकेवपश्मातल्लक्षणं तु कीर्तितं इति
सूर्यस्य संतोनमन्नगणेशं गीर्वाणाः यं नमंति शाक्राद्याः
विघ्नाविलंघ्यं यस्य स्मरणेनापि व्रजंत्याशु सप्तमृद्धाग
णेशस्य दंतपाशांकुशाक्ष्याः विघ्नपरशुसंज्ञेच तथाल
ड्डुकसंज्ञिका बीजपूराख्ययाचासामृद्ध्यंतेलक्षणानिच

मु॰ मंत्रदर्पणे दक्षोत्ताना नामुष्टिः प्रोर्ध्वाग्रां मध्यमा सर
प्र॰ ला कार्या गणेशमुद्रा रदमुद्रेयं समाख्याता १ मु
३५ ष्टिद्वितयं कृत्वा संयोज्य च वामतर्जन्या दक्षिणतर्ज
निकां चेदं गुष्ठाग्रे तदग्रयोः पाशः चेद्यदि स्वं गुष्ठाग्र
35 द्वयं तर्जन्यग्रयोः क्षिपेत् पाशः पाशमुद्रेत्यर्थः २ कृ
त्वा सरलां मध्यां मध्ये पर्वणि तु तर्जनी योज्या आकुं
चयेच्च किंचित्स्यादंकुशमुद्रिका रम्या ३ रदमुद्राथो

वज्रांविज्ञाख्यासैवसंप्रोक्ता ४ परस्युमुद्राकथिता
लड्डुकदाडिममुद्रेनाहृशाह्वलंप्रकुर्वीत तंत्रसारे उक्ता
नो हृद्मुख्यीमथ्यासरलाबद्धमुष्टिका दंतमुद्रासमाख्या
तासर्वागमविशारदैः १ वाममुष्टेस्तुतर्जन्यांदक्षमुष्टे
स्तुतर्जनी संयोज्यांगुष्ठकाग्राभ्यांतर्जन्यग्रेस्वकेक्षिपेत्
एषापाशाख्यामुद्राविद्वद्भिः परिकीर्तिता २ ऋज्वीच
मध्यमांकृत्वातर्जनीमध्यपर्वणी संयोज्याकुंचयेत्

मु· प्र ३६ त्किंचिन्मुद्रैषांकुशसंज्ञिका तर्जनीमध्यमानामा
कनिष्ठांगुष्ठमुष्टिका अथोमुखीदीर्घरूपामध्यमा
विघ्नमुद्रिका ४ परश्चमुद्रानिगदिताप्रसिद्धालडु
36 मुद्रिका बीजपूरादयामुद्राप्रसिद्धत्वादुपेक्षितो
द्विजातिनारामकिशोरनाम्नामुद्राप्रकाशेरचिते
प्रयत्नात् अयंपरिच्छेदश्चभास्यमुद्राविनिर्णयो
नामसंगतश्चतुर्थः ४ वांछतिसुरगणापूज्यपदा

याःकरुणालोकंगिरिवरजायाः रामकिशोरोभी
नोद्दीनश्चरणेपतितोभजनविहीनः पाशांकुशवरा
भीतिखड्गचर्मधनुःशराः मौशलीचतथादोर्भिमहा
योनिरिमाःप्रियाः शाकैर्मन्त्राग्रेय्यैतासामुच्यंतेलक्ष
णानिच पाशांकुशवराभीतिधनुर्बाणाःसमीरिताः
खड्गमुद्रालक्षणं मंत्रदर्पणे बधास्वल्पानामेदक्षां
गुष्ठेनयदिकुर्यान्नस्यादसिमुद्रासरलेसंस्पष्टेतर्ज

मु॰ प्रं॰ ६७

नीमध्ये तदंतरेपि कनिष्ठानामिके बध्वांगुष्ठेनै
वदन्ततः शेषांगुलीन्तुप्रसृतेसंश्लिष्टेवज्रमुद्रिका
अथचर्ममुद्रालक्षणं मंत्रदर्पणे वामहस्तेनहानि
र्यकं कृत्वाप्रसारयेत्पश्चात् आकुंचितांगुलिं चेतक्र
र्यादितिचर्ममुद्रास्यात् तदंतरेपि वामहस्तेनयाति
र्यकं कृत्वाचैवप्रसार्यच आकुंचितांगुलिंकुर्याच्चर्म
मुद्रेयमीरिता मुण्डालमुद्राङ्गुगांमुद्रयाश्चलक्षणं

यष्ठ्यामंत्र दर्पणे उपर्यधो दक्षिणवाममुष्टी कुर्यात्त
दास्यात्कपालाख्यमुद्रा शिरःस्थिता चेदियमेव दौ
र्गी दुर्गाप्रिया विघ्नविनाशिकाख्या आद्यामुशलमुद्रा
तंत्रसारे मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणं
कुर्यात् मुशलमुद्रेयं सर्वविघ्नविनाशिनी मुष्टिं कृत्वा
कराभ्यां च वामस्योपरि दक्षिणं कृत्वा शिरसि संयोज्य
दौर्गी मुद्रेयमीरिता अथ महायोनिमुद्रालक्षणं मं

मु॰ त्रदर्पणे कृत्वा हस्तौ संमुखौ तर्जनीभ्यां बध्नानामे मध्यमा
प्र॰ ष्टष्टसंश्लेष्ये दीर्घमध्ये क्रोडसंश्लेष्ये कनिष्टयोनिः प्रोक्तांगुष्ट
१८ कौ चेत्तदग्रे दीर्घमध्यमे कनिष्टे च क्रोडसंश्लेष्ये मध्यमाक्रो
38 डसंश्लेष्ये तदग्रे कनिष्टयोरग्रद्वये मूलेंगुष्टौ च तयोर्भवति
हियोनिर्महायोनिः तस्या वक्रे मध्ये सांगुष्टे भूतिनी सास्या
त् तयोः कनिष्टयोः तदा योनिरेव महायोनिः स्यात् तस्या
योन्या वक्रे कुट्ले सांगुष्टे श्रंगुष्टयुक्ते तंत्रसारे तर्जन्यना

मिकमध्याकनिष्ठाःक्रमयोगतः करयोर्योजयित्वाचक
निष्ठामूलदेशतः अंगुष्ठाग्रेतुनिक्षिप्यमहायोनिःप्रकी
र्त्तिताः करयोर्भिण्यस्तर्जनीभ्यामनामिकेयोज्ये मध्यमाम
ध्यायोज्या मध्यमध्याक्रोडसंस्थयोस्ताहशकनिष्ठयोर्मूलयचं
गुष्ठाग्रद्वयंनिक्षिप्यते तदामहायोनिर्भवतीत्यर्थः प्रका
रांतरं मंत्रदर्पणे कृत्वाकरौच७टिनौस्वांगुष्ठाग्रंकनीय
सीमूले योनयपरयोनिःस्यान्मुद्राकालीप्रियंकरीत्वा

मु॰ ख्याता तंत्रांतरेपि करौच संपुटीकृत्वा कनिष्ठामूलदे
प्र॰ शतः अंगुष्ठाग्रं योजयित्वा परस्योनि रितीरिता काली
३९ प्रियामुंडमुद्रा तस्या लक्षणमुच्यते मंत्रदर्पणे मुष्टिं तु
39 वामपाणेः कुर्यादभ्यंतरांगुष्ठं दक्षस्य मध्यमाग्रं संल
ग्नतया तर्जन्यां अंगुष्ठाग्रं योज्यं दक्षिणपाणिं च योज
येत् मुष्टौ दर्शयेद् दक्षिणभागे मस्तकमुद्रा स्मृता कात्याः
तंत्रसारे अंतरांगुष्ठमुष्टिं तु कृत्वा वामकरस्य च मध्य